# A-III/1/22AJDS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अनुप्रेक्षा किमुच्यते?
2. अनुप्रेक्षाः कति भवन्ति?
3. अनुप्रेक्षायाः किं प्रयोजनं प्रोक्तम्?
4. संवरेण सह अनुप्रेक्षायाः कः सम्बन्धः?
5. 'अनित्यानुप्रेक्षा' इत्यनेन किं तात्पर्यम्?
6. 'एकत्वानुप्रेक्षा' इत्यनेन किमभिधीयते?
7. धर्मानुप्रेक्षा का प्रोक्ता?
8. लोकानुप्रेक्षा इत्यनेन किं प्रयोजनम्?
9. 'अशरणानुप्रेक्षा' इत्यनेन किं प्रोक्तम्?
10. 'संसारानुप्रेक्षा' इत्यत्र संसारपदेन किं तात्पर्यम्?
11. 'आस्रवः' कः प्रोक्तः?
12. 'संवरः' किमुच्यते?
13. 'धर्मानुप्रेक्षा' इत्यत्र धर्मपदेन किं गृहीतम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. अनित्यानुप्रेक्षायाः स्वरूपं स्पष्टयत।
15. अशुचित्वानुप्रेक्षा इत्यत्र अशुचित्वपदेन किं तात्पर्यम्? सोदाहरणं लिखत।

16. जैनदर्शने अनुप्रेक्षाचिंतनस्य महत्त्वं मोक्षमार्गदृष्ट्या विवेचयत।

17. बोधिदुर्लभानुप्रेक्षाया: स्वरूपं ग्रन्थोक्तदिशा लेखनीयम्।

18. अनुप्रेक्षासाहित्यस्य संक्षिप्तपरिचयो देय:।

19. निर्जराया: स्वरूपं विलिख्य निर्जरानुप्रेक्षा संक्षेपेण विवेचनीया।

**खण्ड: – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्न:) × 10 (अङ्क:) = 20**

20. अनुप्रेक्षासाहित्यस्य महत्त्वं प्रतिपादयत।

21. अनुप्रेक्षाचिन्तनस्य सामाजिकोपयोगिता वर्णनीया।

22. अनुप्रेक्षाचिन्तनस्य मुनिधर्मेण सह सम्बन्ध: विवेचनीय:।

# A-III/2/22AJDS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अनेकान्तस्य लक्षणं किम्?
2. स्याद्वादः इत्यनेन किं तात्पर्यम्?
3. अनेकान्तस्य अवधारणा का?
4. अनेकान्तत्वसिद्धौ का युक्तिः?
5. 'न छलमात्रमनेकान्तः' इत्यनेन किं तात्पर्यम्?
6. अनेकान्तस्य विषयः कः?
7. स्याद्वादो भाषायाः सिद्धान्तः कथमुच्यते?
8. सप्तभंगाः के भवन्ति?
9. सप्तभंगीसिद्धान्तस्य किं प्रयोजनं प्रोक्तम्?
10. सप्तभंगाना प्रयोगे को हेतुः प्रोक्तः?
11. स्याद्वादस्य अपरिहार्यता विवेचनीया?
12. प्रमाणसप्तभंगी का प्रोक्ता?
13. नयसप्तभंगी का प्रोक्ता?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. अनेकान्तस्य वस्तुनः सामान्यविशेषधर्मनिरूपणं करणीयम्।
15. द्रव्यगुणपर्यायाणामेकत्वेपि वस्तुनि कथमनेकान्तता सिद्ध्यति?

16. सप्तभंगन्यायसम्मतः स्याद्वादः विवेचनीयः।

17. सप्तभंगप्रयोगैः संशयादिनिवृत्तिः कथं जायते? स्पष्टयत।

18. प्रमाणसप्तभंगी तत्प्रयोजनं च लेखनीयम्।

19. नयसप्तभंगी तत्प्रयोजनञ्च स्पष्टनीयम्।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. स्याद्वादस्य लौकिकं शास्त्रीयं च प्रयोजनं प्रतिपादनीयम्।

21. भारतीयदर्शनसम्प्रदायेषु अनेकान्तस्य समीक्षा करणीया।

22. लोकजीवने स्याद्वादस्य मूल्यं योगदानं च विवेचनीयम्।

# A-III/3/22AJDS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. ज्ञानस्य विषयभूतः कः प्रोक्तः?
2. द्रव्यस्य किं लक्षणं प्रोक्तम्?
3. द्रव्यस्य स्वभावः कीदृशः प्रोक्तः?
4. षड्द्रव्याणि कानि सन्ति? नामानि लिखत।
5. स्वरूपास्तित्वं किमभिधीयते?
6. सादृश्यास्तित्वं किं प्रोक्तम्?
7. ज्ञानचेतना किमुच्यते? सोदाहरणं लिखत।
8. कर्मचेतना किमभिधीयते? उदाहरणपूर्वकं लिखत।
9. कर्मफलचेतना इत्यनेन किं तात्पर्यम्? उदाहरणपूर्वकं लिखत।
10. उत्पादव्ययध्रौव्यात्मकत्वेऽपि द्रव्यं सदिति कथं संभवति? स्पष्टयत।
11. सत्ताद्रव्ययोः अनर्थान्तरत्वं स्पष्टयत।
12. मूर्तद्रव्यस्य किं लक्षणं प्रोक्तम्?
13. अमूर्तगुणानां किं लक्षणं प्रदत्तम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. जैनदर्शनस्य पदार्थमीमांसा संक्षेपेण करणीया।

15. सत्ताद्रव्ययोः गुणगुणिभावं स्पष्टयत।

16. मनुष्यादिपर्यायाणां जीवस्य क्रियाफलत्वं विवेचयत।

17. गुणगुणिनो नानात्वाभावः प्रदर्शनीयः।

18. जीवस्य कर्मबन्धने के हेतवः प्रोक्ताः? वर्णयत।

19. सांख्यदर्शनस्य पदार्थमीमांसां वर्णयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. न्यायवैशेषिकदर्शनयोः पदार्थसमीक्षा कर्त्तव्या।

21. प्रवचनसारग्रन्थस्य प्रमुखटीकानां परिचयं लिखत।

22. जैनदर्शनस्य द्रव्यमीमांसां विशदयत।

# A-III/4/22AJDS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अधिगमस्य उपायाः के भवन्ति?
2. प्रमाणं किमुच्यते?
3. नयस्य किं लक्षणम्?
4. नयस्य मूलभेदौ कौ?
5. सप्तनयाः के सन्ति? नामानि लिखत।
6. द्रव्यार्थिकनयः कः?
7. पर्यायार्थिकनयस्य किं लक्षणं प्रोक्तम्?
8. नैगमनयस्य लक्षणं किं प्रोक्तम्?
9. व्यवहारनयस्य लक्षणं सोदाहरणं लिखत।
10. कर्मोपाधिनिरपेक्षशुद्ध द्रव्यार्थिकनयः कः प्रोक्तः?
11. अनादिनित्यपर्यायार्थिकनयः कः प्रोक्तः?
12. मिथ्यानयाः के भवन्ति?
13. सम्यक्नयाः के सन्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. नयदृष्टिहीनाः मनुष्याः कथमन्धाः भवन्ति, इति कथनं स्पष्टयत।
15. वस्तुस्वरूपाधिगमे नयानां प्रयोजनं महत्त्वं च विवेचयत।

16. परमभावग्राहिद्रव्यार्थिकनयः किमुच्यते ? सोदाहरणं स्पष्टयत।

17. सादिनित्यपर्यायार्थिकनयः कः ? उदाहरणपूर्वकं विवेचयत।

18. कर्मोपाधिसापेक्षाशुद्धद्रव्यार्थिकनयस्य किं प्रयोजनम् ? स्पष्टयत।

19. कर्मोपाधिनिरपेक्षानित्यशुद्धपर्यायार्थिकनयेन किं तात्पर्यम् ? विवेचयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. तत्त्वाधिगमे नयप्ररूपणायाः महत्त्वं प्रतिपादनीयम्।

21. नैगमादिसप्तनयानां संक्षेपेण प्रयोजनं स्पष्टयत।

22. द्रव्यस्वभावप्रकाशकनयचक्रस्य नयसिद्धान्तप्रकाशने योगदानं स्पष्टयत।